No. ४६७६

Title पद्मपुराणे गुरु व्रतम्

Author ✗

Extent ३ पत्राणि Age सं. १६५५

Subject पुराण माहात्म्यादि

गुरुसूत्रम् पद्मपुराणे

प ६७६

वृहस्पतिव्रत

गुरुवृतं॥

क्रौ ४५

७॥ ॐ श्रीगणेशा॥ युधिष्ठिर उवाच॥ भगवन्केन प्रकारेण लक्ष्मीराविश्च
जायते॥ लोकगेहे विष्णुनः कस्मात्तद्व्रतं वद नारद॥१ नारद उवाच॥ पुरा सत्ययुगे
राजन् विष्णुमतयो नृपाः॥ लक्ष्मी लोकेन संयुक्ता ये त्वरेण गुरुव्रता॥२
युधिष्ठिर उवाच॥ कथं चैव व्रतं कार्यं कस्मिन्मासे कथं कदा॥ ज्ञातुं तं नारद ब्रूहि तत्
सर्वसंशयं छिन्धि नो॥३ नारद उवाच॥ वैशाखे मार्गशीर्षे च माघे चैव विशेषतः॥
स्नात्वा प्रथमतः साध्य व्रतं वाचयेत्तद्दिने॥४ प्रभाते विमले राजन्दन्तधा
वनपूर्वकं॥ स्नानादिकं च नित्य कार्यं चाष्टदलं ततः॥५ तस्योपरि महाराज
कलशस्थापनं ततः॥ पञ्चाष्टक विनिर्माणं सुग्रीवं सुदृढं शुभं॥६ तस्यो
परि ततः पात्रं राजतं वा हि निर्मितं॥ ताम्रेण नाष्टदलं कार्यं सुवर्णकृतमासिको १
७ विचित्ररचनायुक्तं विन्यसेत्कुंकुमादिभिः॥ ... पत्र सुवासिनं महत्त्वं किं कुर्यात्तु

रोरपि। ८ सौवर्णं कारयेज्जीवं पञ्चार्द्धदिग्प्रमाणतः। वामे चक्रं तु कंयष्टिं अक्षमा
लांक मंडलं तु। ९ चतुर्बाहुं शुभांगं शुक्लं जटामुकुटमंडितं। पीतवस्त्र परिधानं सि
तयज्ञोपवीतिनं। १० शालग्रामावा कारयेद्दिव्यां नदद्यां द्विवा पुनः। विन्नया कांच न
कुर्वीन फलं न वास्यान्यथा न वेत्। प्रतिष्ठाप्ये केवलं हि विसर्गं तस्य कार्यं विधानतः।
एतत्सर्वं विधानेन स्थापयेत्कलशोपरि। १२ पीतांबरैः समायुक्तं नानामणिवि
भूषितं। कैकरामुकटाद्यैश्च शोभमानं गुरुं विभुं। १३ सितयज्ञोपवीतं च छ
त्रचामरशोभितं। उपानत्पादुकाश्चैव काकमंडलु समन्वितः। १४ पूजयेन्मन
सा शुद्ध भावेनन्दपनंदनः। शातपत्रैः पाटैः पुष्पैः श्वेतचंदनपूर्वकैः। १५ पी
तेन चंदनेनैव केसराघेन संयुतः। कल्कारकेतकी जाती चंपकैश्च सुतालाञ्छ
वैः। १६ धूपं वा गुरुसारेण कुर्यात्तस्य विष्णोः पुरः। पीतिवकुसुमैः पुष्पैश्च
पूजयेद्भक्तिभावतः। १७ घृतेन दीपकं कुर्यात् तैलेन वा पुनः। पूजयेद्भक्ति

सुक्तेन चैतस्मात्सुरपूजनं ।१८ मंडकाद्योपहारैश्च गुरोरग्रे निवेदयेत् । अर्घ्यश्चवी
जपूरेण कर्पूरारात्रिकं तथा ।१९ पूजादिकं च यत्किंचित्स्वेन मंत्रेण कारयेत् । वे
दिकेन तथा राजन्पौराणेन यथोक्तयः ।२०। नामलिंगैर्नाममंत्रैर्वा विसर्जनुक्रम
र्व तः । धर्मशास्त्रार्थतत्वज्ञ ज्ञानविज्ञानपारगः ।२१ विबुधाधिहराचिंत्यदेवा
नार्यनमोस्तु ते । चतुर्थ्यंतं गुरोर्नाम श्रीकारेण समन्वितं ।२२ नमदंत्यं ततः प्रोक्तो
महामंत्रः षडक्षरः । अनेन विधिना कुर्यात्पूजादिकमतंद्रितः ।२३ होमं चतति
लैः कुर्याद्गुरुनाम्ना च मंत्रवित् । समिधश्चाष्टतरशतमष्टाविंशतिरेव वा ।२४
होतव्या मधुसर्पिस्यां दध्याज्ञार्करया तथा । पिप्पल्यः समिधो ज्ञेया शास्त्रांतरसम
न्वयात् ।२५ एवं प्रोक्तविधानेन त्रयनत्रितयं चरेत् । कुर्याद्वा प्रथमे षट्के गुरुसेवाव
रा०वि स्यतेहि न ।२६ तंडुलान्नं दापयेत्पार्थ व्रती नियमपूर्वकं । षट्के द्वितीये राजेंद्र जीर २
कं चाज्ञाये व्रती ।२७ तृतीये पाणकान्नं च आराधयेत्प्रीतिमानसः । चतुर्थे षट्के रा

ऽनृतं वदायेत्प्रषष्ठि श्रीहरकं। २८ पंचमे ज्ञातपत्रं च प्राशयेत्सर्वकामदं। पयःपानं प्रकु
र्वीत कर्पूरं प्राशयेत्सुधीः। २९ एवं संवत्सरं साग्रं कुर्याद्वाचस्पतिव्रतं। वर्षं वर्षार्द्धमथ
वा कुर्वीतास्य विधानतः। ३० आरंभे वाथवा मध्ये व्रती चोद्यापनं चरेत्। आंते वाथ म
हापानं नतु याच्छ्रद्धयान्वितः। ३१ तत्र कुर्याद्द्विजोपेण पूजादिकं मनोजः। जोन्न
तिन हिरण्यादि ज्ञाप्यास्तु च ममैनोहरां। ३२ उपानत्पादुकाछत्रं कमंडलुमथापि वा
पदं चाष्टविधं दद्याद्द्विजाय सुमनाविलेः। ३३ सुवर्णस्य विवर्त्तनः श्रोतं दद्दक्षिणाफलसाधना। कुकू
सुस्मदातव्यं व्रतं संपूर्णमिह तवो। ३४ यावनालं च गोधूमं मंत्रदोयि चार्थसिद्धिदं। सर्वान्नेन
वा कर्त्तव्यं व्रतं तं गंन कारयेत्। ३५ एवं यः कुरुते वीर व्रतं गुरुदिने नृप। न याति नरकं घो
रं नद्रमीष्टसिद्धिं प्रजायते। ३६ पुत्रपौत्रादिकं प्राप्य मोदते शतवत्सरं। भुक्त्वा च विपुलान्
भोगान्प्रयाति परमं पदं। ३७ कीर्तिं च परमां प्राप्य स्वर्गलोके च मोदते। अश्वरोग
ण संयुक्तो नंदते देवकाननात्। ३८ किं यं ने तत्कुलं च व किं व्रतेवाचस्पतेः कृतो। येनवे

ज्ञातमात्रेण सकलां सिद्धिमाप्नुयात्। ३९ यम प्यावरराजेंद्र येन राज्यमवाप्स्यसि।
नारदेनोक्तमात्रं तु ज्ञातं राज्ञा तु [illegible] देवतो। ४० आप्तं राज्यं च सकलं पुत्रपौत्रसम
न्वितं। पृथिव्यां ये करिष्यंति गुरो[illegible] मिदं नराः। ४१ नारीणां सुखसौभाग्यं
नारदेन महर्षिणा। सेवाने ष्यां[illegible] ष्यंति [illegible] यः सकलार्थदा। ४२ इति श्रीप
द्मपुराणे युधिष्ठिरनारदसंवादे गुरुकृत्तं संपूर्णं। संवत् १८५५ वर्षे ज्ये
ष्ठे शुक्ल दशमी गुरवासरे स्नान [redacted] तीर्थस्था स्यं नरनागरे [redacted] र्थे जिखिता।

३

३